जल्केषुस्वरान् तत्पत्रेषुअष्टसुपूर्वादिक्रमेणसप्तचत्वारिंशत्कालमंत्राणांषट्षट्संख्याकानष्टमेपंचसंख्याकांल्लि

व॰ लिखेत् क्रुंजानकीवल्लभायस्वाहेतिदशार्णेनाग्निवहिर्वेष्टयित्वा नर्येवकादिक्षांतैरष्टदिग्विदिक्षो दौ हुं इति नृसिंहवराहवीजे
लिखेत् शेषं स्पष्टं इति मंत्रमयं यंत्रं महत्या महिमायाय यद्कं प्रकल्पते अगस्त्यः वक्ष्यामि रामभद्रस्य यंत्रं कवचसंज्ञि
५४ तं धारणात्तस्य मर्त्यानां जायते सर्वसिद्धयः नश्यन्ति सर्वपापानि विपदो यान्ति संक्षयं भूतप्रेतपिशाचाद्याः पला
यंते च दर्शनात् मंत्राणि स्थिरतां यान्ति शत्रवो यान्ति मित्रतां ग्रहाः प्रसादं संयान्ति दास्यं यान्ति महीभृतः कि
54 मत्र बहुनोक्तेन नास्त्यनेन सदृग्दुर्लभं यंत्रेण रामभद्रस्य वज्रपंजरसंज्ञितो कोष्ठैः सहैकविंशत्या पंक्तिद्वयविभूषि
ते विन्यसेद्ष्टमंत्रमेतस्मिन्कवचं लिखेत् द्वादशार्णस्य वर्णानि यथाग्रहं तेषु विन्यसेत् अनुलोमविलोमाभ्यां प्राद
क्षिण्यक्रमेण च राघवादीनि नामानि नमस्कारेण योजयेत् मे शिरः पात्विति चस्यात्सर्वतो वाक्ययोजना सा
ध्याख्यं संयुतं षष्ठाख्यं स्वाद्येकादशे गृहे स्वकाशमशक्तिवाग्वर्णानारसिंहमतः परं लक्ष्मीपाशांकुशार्णामिवा
राहंफट्स्वरूपकं स्वाहेति रामभद्रस्य द्वादशार्णमितीरितं सौवर्णे राजते पत्रे भूर्जे वा सम्यगालिखेत् अथवा ताम्र
पत्रे च गुल्लकीहार्यधारयेत् यावज्जीवं तु सौवर्णे रौप्ये विंशतिवार्षिकं भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपत्रके
एवं लेख्यं विशेषेण यंत्रं शक्तिः प्रतिष्ठिता पंतारामबलोपेतामित्यादिश्लोकषट्कं यंत्राद्बहिः प्रदेशे तु हंसाकारेह
त्वालिखेत् सर्वदुःखोपशमनं सर्वोपद्रवनाशनं आयुरारोग्यमैश्वर्यपुत्रपौत्रवर्द्धनं सर्वान्कामानवाप्नोति विष्ठ ५४

लोकं सद्भुतिं अस्यार्थः वक्ष्यामीत्यारभ्य वज्रपंजरं सर्जितेनेतीत्येवं स्पष्टं दक्षिणोत्तररेखाद्वयस्योपरि प्राक्पश्चिमायां रेखा द्वादश
कोष्ठिते द्वाविंशतिकोष्ठकानि भवन्ति अन्तिमकोष्ठद्वयमध्यगते रेखायाः करणेनैकविंशतिसार्द्धपंक्तिद्वयविभूषितं उत्तमं ।
चक्रं विन्यसेत् श्रीरामकवचं लिखेत् तद्यथा द्वादशाक्षरमंत्रवर्णानां मध्ये एकैकेन राघवाय नमः मे शिरः पातु इति यो
जितं संपुटितं तेनैकैकपदं एकैकस्मिन् कोष्ठे दक्षिणे एवं लिखेत् एवमपरिपंक्तौ वामे विलोम्येन तद्दशपदानां समादेशः अथ
तत्पंक्तौ प्रातिलोम्येन पुनर्विपरीतं तेनैव मंत्रवर्णेनैकैकं संपुटितानां उपरितनानां दशपदानां समादेशः एकाद
शकोष्ठे द्वादशस्थितं वर्णद्वयं ततो ऽन्तकस्य वक्षा मध्ये पार्श्वयोः ऊरुकृत्तदेव वर्णद्वयं विपरीतं लिखेत् एवमे
कविंशतिकोष्ठकानां विनियोगः तदेव द्वादशवर्णात्मकं मंत्रं दर्शयन्ति स्वेत्यादिना सौवर्णं इत्यादि यंत्रशक्तिः अ
तिहितं तत्प्रयं स्पष्टं तत्र यावज्जीवमित्यादितास्तु पत्रश्लोकं सर्वयंत्रसाधारणं एतामित्यादि श्लोकषट्कं यंत्राद्बहिः स्थलं तद्
तं यथा भवति तथा लिखेत् शेषं स्पष्टं नसंतिष्ठते वायस्यैवदीक्षाविधिक्रमः रामरक्षां वदन्नेतद्दलश्रीदलमर्पयेत्
दीक्षांतरशतेनापि नैतत्फलमवाप्यते अन्यगत्येपनचोक्तत्वात् रामरक्षासमं नहि षादलिए पक्रमेणचेति चकारसूचित
र्थं यंत्रयानरोक्तं द्रष्टव्यं हंसोयंत्रस्य जीवस्यात्मध्येबीजाद्यो न्यसेत् हंसः सोहमिति प्राणांईशात्याविक्रमात् लिखेत्
इदं तेनेत्यसेत्यार्थं ॐ श्रीं अतेतथेवच विशेषोष्टदलादौ तु गायत्रीं लिखेमेस्मृतः यंत्रराजाय विद्महे वरप्रदाय धीमहि

चं॰ तन्नोयंत्रः प्रचोदयात् इत्यर्णान्मंत्रगायत्र्याः प्रतियंत्रविशेषतो लिखेत् अथवा थावकाशेन प्रतिष्ठां प्राणादीं लिखेत् प्रयोगसमारे
५५ भूमिस्थे स्वेशो वस्थंडिले क्षिप्तनिर्माल्यसंगते द्रव्यमालेख्य तंत्रोर्यंत्रज्ञानं तथारयेत् इति सर्वयंत्रसाधारणक्रमः इत्य
ष्टमं यंत्रं इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदवनश्रीचरणशिष्यानंदवनविरचितायां श्रीरामार्चन
चंद्रिकायां चतुर्थः पटलः ४ चैत्रादिमासकृत्यं प्रयुनातन्प्रकाश्यते राममंत्रस्य सिद्ध्यर्थं यदुक्तं नारदादिभिः मधु
शुक्लतृतीयां च जानकीरमणं प्रभुं राजोपचारैः संपूज्य मासमांदोलयेत्कलौ दक्षिणाभिमुखं देवं दोलमानं स
देश्वरः सप्तजितं सकटघ्नासर्वपापैः प्रमुच्यते दोलारूढं प्रपश्यंति ये कृत्स्नं मधुमाधवे अपराधसहस्रैस्तु मुक्तास्ते नात्र सं
शयः दोलारूढस्य देवस्य ये कुर्वंति जागरं सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत् इति गारुडे दोलोत्सवः चैत्र
शुक्लनवम्यां तु कर्तव्यं व्रतमुत्तमं अगस्त्यसंहितायां यन्महत्यां समुदीरितं श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका
तस्मिन्दिने महापुण्ये राममुद्दिश्य भक्तितः यत्किंचित्क्रियते कर्म तद्भवेदक्षयं ध्रुवं उपोषणं जागरणं पितृनुद्दिश्य तर्प
णं तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः रामप्रवपरं ब्रह्म तद्दिनं रामतोषणं इत्यादि नेदमस्य नित्यं नैमित्तिकं का
म्यव्रतं चेति विचार्यते निष्कामानां विधानां तु न तु काम्यतावदिष्यते समुदन्तोपि हि स दर्शरामनवमीव्रते तत्पजंतिष्ठ
रश्रेष्ठादेवं दोपि विशेषतः इति सदा यदस्य ग्रहणादेतत्तस्तु तिपरं न हि नैमित्तिकं च न तथा सदेति श्रूयते यतः यावज्जीववि

श्री॰= ५५

भाव्यातंसदापार्थेनवान्यथा चैत्रमासेनवम्यांतुशुक्लपक्षेरघूत्तमः प्रादुरासीत्पुराब्रह्मन्परब्रह्मैवकेवलं तस्मिन्दिनेतुकर्त्तव्यं
उपवासव्रतंसदेतिनित्यमेवभवेत्तस्माच्छ्रीरामनवमीव्रतं नतस्यस्यान्नित्यत्वंप्रत्यवायात्फलश्रुतेः सूर्यग्रहेकुरुक्षेत्रे
महादानेकृतैर्मुहुः यत्फलंतदवाप्नोतिश्रीरामनवमीव्रतादित्यादिभिरेवंफलश्रुतेर्नित्यलक्षणाभावेनाथवा ननित्यता
तत्रनायोग्निहोत्रादौविरोधतः नांत्योप्यकारणेत्वस्यमहादोषश्रुतेस्फुटं प्राप्तेश्रीरामनवमीदिनेमर्त्यौविमूढधीः उपो
षणंनकुरुतेकुंभीपाकेषुपच्यते यस्तुरामनवम्यांतुभुंक्तेमोहाद्विमूढधीः कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयइत्यादिश्रु
तःस्वीकरणेदोषविधेश्चनित्यतास्थिता कुर्याद्रामनवम्यांयउपोषणमतंद्रितः मातुर्गर्भमवाप्नोतिनैवरामोभवेत्स्वयं न
स्मात्सर्वात्मनासर्वैःकृतैवनवमीव्रतं मुच्यतेसर्वपापेभ्योयांतिब्रह्मसनातनं इतिपापक्षयद्वारामोक्षार्थत्वंचगम्यते
नसंयोगपृथक्त्वेनविरुद्धफलनित्यते नित्यानामपिदर्शादियागानांनित्यताश्रुते नत्वर्थवादत्वंस्यात्फलंयापक्षया
दिकं फलंस्यादर्थवादायद्रव्यसंस्कारकर्मसु प्रतिज्ञायांतुनैवंस्याद्विधिबाधाफलेसति संस्कारत्वांगकर्मत्वतस्यता
नामिहकर्मणि भूतभाव्युपयोगंहिद्रव्यंसंस्कार्यमिष्यते नोपयुक्तःप्रमातत्रप्राप्तोदानोपयोज्यते नाप्यंगत्वंप्रधान
स्याश्रवणादिहकस्यचित् प्रधानंफलसंबंधितद्योग्यांगमितिस्थितेः ज्यहादिवच्चकर्मांगद्रव्यत्वेनावकल्पते प
रार्थत्वनिदानंचतन्नैवात्रावकल्पते नत्वर्थवादहीनानांविधीनांविधिताकथं अर्थद्वयपरत्वेतुवाक्यभेदःप्रस

चं.
५६
56

ज्यते सैवमर्थद्वयं युक्तं नाविरुद्धादियागवत् तस्मात्पूर्वत्र यद्वा रामो नार्थवाद्यनित्यतः न्यायोपबृंहितावाक्यात्सानन्तव्यान्यायवेदि
भिः इति रामजन्मनवमीनित्यता शुद्धाविद्धेति भेदेन नवमी सद्विधा मता सामान्येनाधिका चेति शुद्धापि नवमी द्विधा पु
नर्वसुऋक्षसंयोगवियोगाभ्यां तथा द्विधा समादिऋक्षयोगाविभेदैर्विद्धापि षड्विधा एवं द्वादशधा भिन्ना नवमी तत्र निर्ण
यः महाफलप्रदा शुद्धा पुनर्वसुऋक्षयोगतः चैत्रमासे नवम्यां च जातो रामः स्वयं हरिः पुनर्वसुऋक्षसंयुक्ता सा तिथिः सर्व
कामदा पुनर्वसुऋक्षसंयोगः स्वल्पोपि यदि दृश्यते चैत्रशुद्धनवम्यां तु सा तिथिः सर्वकामदा श्रीरामनवमी प्रोक्ता कोटि
सूर्यग्रहाधिका चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि सैव मध्याह्नयोगेन महापुण्यतमा भवेत् मेषं पूषणि संप्राप्ते लग्ने कर्क
टकाह्वये आविरासीत्सकलया कौसल्यायां परः पुमानिति केवलापि सदोपोष्या नवमी शब्दसंग्रहात् तस्मात्सर्वात्मना सर्वैःका
र्यंवै नवमीव्रतमिति सर्वैरिति सर्वेषामधिकारः प्रकाश्यते विद्धे वा चेदृक्षसंयुक्ता व्रतं तत्र कथं भवेत् विद्धानिषेधश्रवणान्नवमी
वेति दाक्षतः नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै दशम्यामेव पारणमिति विष्णवानां विशेषात्तत्र
विष्णुपरैरिति दशम्यादिषु हृषिकेशे हि द्वात्याज्यैव वैष्णवैः तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितं दशम्यामेव शब्देन दशमीनैव लंघ
येत् निश्चित्यैवं विचारेण नवमीव्रतमाचरेत् इति श्रीरामजन्मनवमीनिर्णयः वैष्णवैरिति वाक्यादित्तेषां लक्षणमुच्यते संगस
शुद्धं सन्यासमस्य चषिलेदेवतं सदीक्षाविधिसत्ज्ञानं समयं चैकादशादरं अष्टाक्षरमथान्यं वा येमंत्रं समुपासते ज्ञेयास्ते वैष्णवा लो

५६

केविष्णुवंनरनाःसदा सदीक्षाविधिमार्गेदामंत्रराजंमयंत्रंयंसहस्रान्तरंसंयुक्तंमूलस्तुत्यादिभेदतः पचार्यंतनत्र्यंपंचयेदिशाःसम्प्रपा
स्तेते महावैष्णवसंज्ञास्तेमहाविष्णोरतिप्रियाः नचलतिनिजवर्णधर्मतोयस्सममतिरात्मसुहृद्विपक्षपक्षे नहरतिनवहंतिक
श्चिदुच्चैर्निजमनसंतमवेहिवैष्णवाग्रमितियाम्ये त्रिभुवनविभवहेतवेप्यकुंठस्मृतिभिर्दिशुग्यान् नचलतिभगवत्पदारविंदा
ल्लवनिमिषार्द्धमपिसवैष्णवाग्र्यः इतिभागवतेश्चत्वावैष्णवलक्षणं श्रुमार्गेशरीरस्यत्यादिसवाविलोकयेन्नायेमेकादशि
गमांनित्यत्वादस्यकर्मणः अलंकारंपुष्पवस्त्रगंधधूपानुलेपनं उपवासेनदुष्यतउणपत्नीणांगनथाजनं सतांबूलमतांबूलम
भोजनमभोजनं मन्वादिस्मृतिभिःप्रोक्तंचतुर्विधमुपोषणं त्रिरात्रादिमतांबूलमेकादश्याद्यभोजनं अतांबूलंचपक्षांतेसभोज
नमुदाहृतं एकभक्तेननक्तेनायाचितेनहविष्यतः पयोमूलफलैर्वापिवालवृद्धातुरःक्षिपेत् हविष्यभोजनंस्नानंस
त्यमाहारलाघवं अग्निकार्यमधःशय्यांनक्तभोजीषडाचरेत् अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः हविर्ब्राह्मणका
म्यागुरोर्वचनमौषधं इतिप्रतितिथिः स्तत्तीर्णामाहुर्वागमस्यप्रकारःसोभिधीयते क्रमेणयोजपत्नस्यव्रतोकर्त्मार्थेब्रता
र्थिना षडक्षरादिकैराममंत्रैःस्यात्पूजनंयथा सर्वेषांराममंत्राणांमंत्रराजःषडक्षरः तारकब्रह्मचेत्युक्तंतेनक्षत्रापश्यपते
यहाग्रहषट्कोयेदीक्षाविधिमजानतः वैदिकस्याथभावेनतुनाममंत्रेभवेद्ध्रुवं अष्टम्यांचैत्रमासस्यशुक्लपक्षेजितेंद्रियः
दंतधावनपूर्वंतुस्नानंकुर्याद्यथाविधिः नद्यांतडागेकूपेवाहृदेप्रस्रवणेविक ततःसंध्यादिकाः कुर्यात्संस्मरनराघवं

वं॰ ५८

57

हृदि गृहमागत्य विप्रेंद्र कुर्य्याद्देवोपासनादिकं दांतं कुटुंबिनं विप्रं वेदशास्त्रारतं सदा श्रीराममंत्रजापनिरतं सुशीलं दंभवर्जितं विधिते
राममंत्रेण रामं मंत्रैकसाधनं आहूय भक्त्या संपूज्य वस्त्रैर्यात्रार्थयन्निति श्रीरामप्रीतिमावाप्तं करिष्येहं द्विजोत्तम तत्रा
चार्यो भव प्रीतः श्रीरामोस्ति त्वमेव मे इत्युक्तोऽनेन तं विप्रं स्नापयित्वा ततः स्वयं तैलेनाभ्यंगपूर्वं स्नाया चिंतयन् राघवं हृ
दि स्वेतावरधरः स्वेतगंधमाल्यानि धारयेत् अर्चितो भूषितस्त्वैव कृत्वा मध्याह्निकक्रियाः आचार्यं भोजयेत्पश्चात्सात्त्विका
न्नैः सुविस्तरं भुंजीत स्वयमप्येवं हृदि राममनुस्मरन् नवम्यामंगभूतेन एकभक्तेन राघव इक्ष्वाकुवंशतिलक प्रीतो भव
भवप्रिय इति निवेदनमंत्रः एकभक्तं ब्रवीन्नत्र सहाचार्यो जितेंद्रियः स्थापयन् रामकथां दिव्यां महः शेषं नयेन्मुने सायंसंध्या
दिकाः कुर्य्यात्क्रिया राममनुस्मरन् आचार्यसहितो रात्रावधः शायी जितेंद्रियः वसेत्स्वयं तथैकांते श्रीरामार्पितमा
नसः आचार्यकरणेऽशक्तः स्वयं भक्त्या समेतस्तदा इत्यष्टमीकृत्यं ततः प्रातः समुत्थाय स्नात्वा संध्यां विधाय च प्रातः सर्वा
णि कर्माणि शीघ्रमेव समापयेत् उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव तेन प्रीतो भव त्वं भोः संसारात्त्राहि मां हरे इत्यु॑ एवा=
पनिवेदनमंत्रः ततः स्वस्थमना भूत्वा विद्वद्भिः सहितो नच स्वगृहे चोत्तरे भागे यागमंडपमारभेत् चतुर्द्वारं पताकाढ्यं
सुवितानं सतोरणं मनोरमं महोत्सेधं पुष्पाद्यैः समलंकृतं शंखचक्रगदापद्मैः शार्ङ्गैः समलंकृतं गरुत्मद्वाङ्कुवा
णैश्चदतिणैः समलंकृतं ॑दारवज्राङ्कुशैश्चैव पाशैश्चैव समलंकृतं पद्मरागेन्द्रनीलैश्च कौवेरैः समलंकृतं मध्ये हस्तचतु ५८
गं=

क्वाप्येवेदिकायुक्तमायतने प्रविश्य पत्न्या गीतैर्वाद्यैश्चापि समंयुतं पुण्याहं वाचयेत्तत्र विद्वद्भिः प्रीतमानसैः ततः संकल्पयेद्दे
वं राममेवमनुस्मरेत् अस्यां रामनवम्यां च रामाराधनतत्परः उपोष्याष्टसु यामेषु पूजयित्वा यथाविधिः इमां स्वर्णमयीं राम
प्रतिमां सम्प्रयत्नतः श्रीरामप्रीतिदासेन रामभक्ताय धीमते प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे अनेकजन्मसंसिद्धान्यभ्य
स्तानि महान्ति च इति त्रिः संकल्प्य शक्त्याशक्त्यात्यशक्तः स्वमूर्तिनिर्माणमुच्यते ततः स्वर्णमयीं रामप्रतिमां पलमानतः
निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीं बिभ्रतीं दक्षिणकरेण ज्ञानमुद्रां महाशुभे वामेनाधः करेणाराद्देवीमा।
लिङ्गसंस्थितां सिंहासने राजते च पलद्वयविनिर्मिते अशक्तो यो महाभाग तस्य वित्तानुसारतः पलेनार्द्धेन तदर्द्धा।
र्द्धेन वा भुते ततोऽप्यशक्तो रौप्येण कारयेद्द्युनन्दन लोहेन निर्मितां वापि शिलायां दारुणापि वा यद्वालेख्येऽपि लेख्या।
वामात्तरे करगतं हरिम् कोमलांगं विशालाक्षमिंद्रनीलसमप्रभं दक्षिणांगे दशरथिं पुत्रावेक्षणतत्परं पृष्ठतो ल।
क्ष्मणं देवं सच्छत्रं कनकप्रभं पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ अग्रेप्यव्यं हनूमन्तं रामानुग्रहकांक्षिणं वित्तशाठ्य
मकुर्वाणो मूर्तिं कुर्यात्प्रयत्नतः विभवे सति को मोहात्कुर्याद्विधिविस्तरं न तत्फलमवाप्नोति देवं द्रोहः स उच्य
ते इति मूर्तिलक्षणं आसनोपरि संवेश्य पत्न्या सजालं विधाय च शंखप्रपूजयेद्देवं गंधपुष्पाक्षतादिभिः कलशं वाम
भागस्थं पूजाद्रव्याणि वादरात् पात्रे च प्रोक्षयेद्द्रव्यान्यात्मानं मंत्रमुच्चरन् इति शंखप्रतिष्ठा सर्वतोभद्रमालिख्य वे

चे. दिकोपरि सिंदूरं मध्ये नीलोत्पलदलैः पूर्णकुंभं रत्नोदकं शुभं हृतपल्लवपुष्पैश्च युक्तं संस्थाप्य चार्चितं सौवर्णं राजतेनाथ यानेष
ष्कोणमालिखेत् अलाभे विल्वपीठे वा कलशोपरि संस्थिते स्थाप्योपरि वस्त्रयुग्ममच्छिन्नं सदशं ततः दिव्यसिंहास
५८ नं तत्र स्थापयित्वार्चयेत्सुधीः ॐ नमो भगवते विश्वाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः
इति मंत्रेणाकृष्य पुष्पाञ्जलिं पुनः इति पीठार्चा अर्घ्यपाद्यादिकं दद्यात्स्नानं पंचामृतेन च लेप्यादौ नोभिषेकः स्याद
58 द्याद्वस्त्रोपवीतकं इति स्नानं ततः संस्थाप्य पीठे तत्पूजां कुर्याद्यथाविधि आवाहनं स्थापनं च सन्निधापनमेव च सन्नि
रोधनमेव स्यादवकुंठनमंजसा तत्तन्मुद्राभिरेवं स्याद्देवं संप्रार्थ्य भक्तितः नानारत्नविचित्राणि वस्त्रादाभरणानि
च हिमांबुद्रहरुचिरचंदनसारसमन्वितं गंधं दद्यात्स्वयत्नेन सागुरुं च सकुंकुमं कल्हारकेतकीजातीपुंनागाद्यैः
प्रपूजयेत् चंद्रकैः शतपत्रैश्च सुगंधैः सुमनोहरैः हृतपल्लवपुष्पैश्च दूर्वाभिस्तुलसीदलैः कोमलैर्विल्वपत्रैश्च।
अशोककुसुमैः तथा रामस्य जननी चासि राघवात्मकमिदं जगत् अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते इ
ति कौशल्यार्चा नमो दशरथायेति पूजयेत्पितरं ततः इति पितृपूजनं ततो न्यस्याप्य देवेशं सपरिवारं समर्चयेत् पूर्ववि
ष्कोणेषु हृदयादीनि षडंगमात् इति प्रथमावरणं हनूमंतं ससुग्रीवं भरतं सविभीषणं लक्ष्मणं गदशत्रुघ्नं जांबवंतं द
लादिषु इति द्वितीयं धृष्टिं जयंतं विजयं सुराष्ट्रं राष्ट्रवर्धनं अकोपं धर्मपालाख्यं सुमंत्रं दलमध्यतः इति तृतीयं द ५८

लाग्नेलोकपालांश्च चतुर्थे तदस्त्राणितद्यतः नमस्कारचतुर्थ्याभ्यांतामसमंत्रैः प्रपूजयेत् पंचमे यंदांचवावयन्स्वर्पदीपंचा
स्मैसमर्पयेत् भक्ष्यभोज्यादिनाभक्त्यानैवेद्यंविधिनार्पयेत् आचामंचसतोहूलंमहानीराजनंततः नमस्कुर्यान्नतस्तो
त्रैस्तुत्वाचप्रजपमन्वे श्रावनजयंतीमाहात्म्यंरामकथांतथा रामभक्तैःसमंयामंनयेद्रामंमनुस्मरन् इतिप्रथम
याममकृत्य शंखपात्रामनाचांवकुर्य्याद्यामेत्वतंद्वितः यामेद्वितीयेसंप्राप्तेमध्याह्नेजन्मभावयेत् उच्चस्थेग्रहपंचकेस
रगुरौसंदरेनवम्यांतिथौलग्नेकर्कटकेपुनर्वसुयुतेमेषगतेपूषणि निर्दग्धेनिखिलाःपलाशसमिधोमध्योदयोध्या
दयोध्यारणेरविर्भूतमभूतपूर्वविभवयत्किंचिदेकंमहः मंत्रैर्वेवादयेद्राद्यानर्वैदयाजगत्पतेः फलंपुष्पांबुसंपूर्णंगृ
हीत्वाशंखमुत्तमं अशोकभूतकुसुमैर्युक्तंचंदनलसीदलैः दशाननवधार्थाययधर्मसंस्थापनायच दानवानांवि
नाशायदैत्यानांनिधनायचपरित्राणायसाधूनांजातोरामःस्वयंहरिः गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघ इत्य
र्घमंत्रः पुनःपुष्पांजलिंदत्वायामयामेष्टंद्वितः पूजयेद्विधिवद्भक्त्यादिवारात्रेनयेद्बुधः ततःप्रातःसमुत्थायस्नानसं
ध्यादिकाःक्रियाः समाप्यविधिवद्रामंपूजयेत्पूर्ववन्मुनेततोहोमंप्रकुर्वीतमूलमंत्रेणमंत्रवित् पूर्वोक्तपद्मकुंडे
वास्थंडिलेवायथाविधि लौकिकाग्नौविधायाथशतमष्टोत्तरंततः साज्येनपायसेनैवस्मरन्राममनन्यधीः त
तोभक्त्यासमंत्रोष्ठ्यआचार्यपूजयेन्मुते कुंडलाभ्यांसरत्नाभ्यांअंगुलीयैरनेकधा गंधपुष्पादितैर्वस्त्रैर्विचित्रैःसम

वं॰ नोहरैः ततोरामंस्मरन्ध्यादेवंमंत्रमुदीरयन् इमांस्वर्णमयींरामप्रतिमांसमलंकृतां चित्रवस्त्रयुगछन्नांरामोहंराघवा
यते श्रीरामप्रीतयेदास्यत्वष्टोभवत्वराघव इतिप्रतिमादानमंत्रः इतिदत्वाविधानेनदद्याद्वैदक्षिणांशुभे अन्येभ्यश्चय
५९ थाल्पायांगोहिरण्यादिशक्तितः दद्याद्दासोयुगंयान्ययथाविभवमादितः ब्राह्मणैःसहभुंजीतनेभ्योदद्याच्चदक्षिणां
तत्प्रसादस्वीकारः कृतेयत्पारणंमया तेनव्रतेनप्रीतस्त्वंस्वस्मिन्भक्तिंप्रयच्छमे इतिपारणासंकल्पः कृत्वैवंब्रह्म
59 हत्यादिपापेभ्योमुच्यतेध्रुवं तुलापुरुषदानादिफलंप्राप्नोतिमानवः अनेकजन्मसंसिद्धपापेभ्योमुच्यतेध्रुवं वहु
हुनाकिमिहोक्तेनमुक्तिस्तस्यकरेस्थिता कुरुक्षेत्रेमहापुण्येसूर्यपर्वण्यनेकशः तुलापुरुषदानाद्यैःकृतैर्यल्लभ्यते
फलं तत्फलंलभतेमर्त्योदानेनानेनसुव्रत इतिदशमीकृत्यं अकिंचिनोपिनियतउपोष्यनवमीदिने कृत्वाराजा
गरणंभक्त्यारामभक्तैःसमन्वितः स्मरन्रामंधियाभक्त्यापूजयेद्विधिवत्सुते जपन्राममनुंमायारामानंगसम
न्वितः एकादशवाविधिवत्सर्वन्यासकृतेनान्वितः प्रातःसंध्यांचविधिवद्दिवासंध्यादिकाःक्रियाः गोभूतिलहिरण्याभिर्दद्याद्वि
त्तानुसारतः श्रीरामचंद्रभक्तेभ्योविद्वद्भ्यःश्रद्धयान्वितः पारणंचप्रकुर्वीतब्राह्मणैःसहशक्तितः एवंयःकुरुतेभक्त्यासर्व
पापैःप्रमुच्यते गंगायांप्रतिपेद्भिष्यांलेख्यामूर्त्तिरहेत्यसेत्र इतिकिंचनव्रतं शक्तस्यपद्भतंप्रोक्तमशक्तोद्यापनंव्रतम्
तदपिस्यायथाशक्त्यामार्गेत्सकलंसदा एकामपिनरोभक्त्याश्रीरामनवमीव्रते उपोष्यकृतकृत्यःस्यात्सर्वपापैःप्र ५९

मुच्यते अपिशब्दाद्दशान्यस्यस्पृष्टैर्म्मुदानंतत्सूचितं इतिकिंचतद्व्रतंयापनंवसूचितं वर्षेवर्षेसमर्थस्यव्रतेनैवप्रदर्शिता ननुस्यायापनं
किंविद्वानादन्यद्द्रियेत सर्वव्रजस्यस्पृश्यार्थेसदारामव्रतंचरेत् नान्येनास्याद्विवन्द्द्विरेनैनेदास्यप्रदर्शिता इतिसमर्थोयापन
तयः इत्यगस्त्यसंहितायांरामजन्मनवमीजयंतीव्रतंसमाप्तम् द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्सवः बोधायनादिभिःप्रो
क्तः कर्तव्यःप्रतिवत्सरं तत्रस्यात्स्वापतिथिषुवस्त्रादेर्दमनार्पणं वह्निर्विरिंचोगिरिजागणेशः फणीविशाखोदिनकृन्म
हेशाः दुर्गान्तकोविष्णुहरिस्मरश्चसर्वःशशीचेतितिथीशपूज्याः क्रियालोपविघातार्थंयत्त्वयाविहितंप्रभोः नमेविघ्नोभ
वेदत्रकृपांकुरुतदयामयि सर्वथासर्वदाविष्णोममत्वंपरमागतिः उपवासेनतत्त्वांदेवतोषयामिजगत्पते कामक्रोधादयो
येतेनमेस्युर्व्रतघातकाः अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं तावद्रक्षात्वयाकार्यासर्वस्यास्यजगत्पते एवंविज्ञाप्यदेवे
शंगुरुपादोष्णमप्यचप्रातःस्नात्वासमभ्यर्च्यदेवेशंविधिवत्ततः गच्छेद्दमनकाराममेकादश्यांसुशोभितं क्रमेणाद्यायत
द्वैवपूजयेच्चंदनादिनातेषामिरामपूजार्थंइतिसंप्रार्थ्यततमेतत् उत्पाद्यपंचगव्येनप्रोक्ष्यप्रक्षाल्यवारिणा अशोकमूलेतं
थादेशुस्थंडिलेपूजयेत्क्रमात् अशोकंचतथाकालंवसंतंकाममेवच ॐअशोकायनमस्तुभ्यंकामस्त्रीशोकनाशन शो
कार्त्तिहरमेनित्यमानंदंजनयस्वमे अनेनपूजयेत्पुष्पैरशोकंशोकनाशनं ॐतद्यादिकालपर्यंतःकालरूपोमहाब
लः कलतेचैवयःसर्वंतस्मैकालात्मनेनमः अनेनपूजयेत्कालंमदयंकलनात्मकं २ वसंतायनमस्तुभ्यंहतगुल्म

चं॰
६०
60

लतांप्रिय सहस्व सर्वसंवासकामरूप नमोस्तु ते वसंतपुष्पैरमनामनुना कामरूपिणं ३ ॐ काम भस्म समुद्भूत रतिबाष्पपरिप्लुत
ऋषिगंधर्वदेवादिविमोहक नमोस्तु ते संग्रहदमनं पुष्पं पूजयेन्मनुनामुना ४ ॐ नमोस्तु पंचबाणाय जगदाह्लादकारि
णे मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय च दमनं चोपनिहितं मंत्रेणानेन मन्मथं दमनं तं पृथक्कृत्वा भागेनैकेन मन्मथं
पूजयेद्रक्तमार्गीणां परिवारसमन्वितं कामायतमशेषं मंत्रलक्षणावादिकः मंत्रेणानेन दमनं पूजयेद्गंधपुष्पकैः धौते
नवाससाच्छाद्य निधाय पटलेन वै घंटापुष्पसूक्तादिस्वनैः स्वगृहमानयेत् इति गृहानयनं वक्ष्यमाणप्रकारेण द
मनं वाधिवासयेत् निशायां रामचंद्राग्रे कुर्यादष्टदलं शुभं व्यक्तं सितासितारक्तपीतवर्णप्रपूरितं चतुष्कोणं बहिः कृत्वा
पीतवर्णेन पूरयेत् तद्बाह्ये श्वेतपीताभ्यां वर्तुलमंडलद्वयं तद्बाह्ये स्याच्चतुःकोणं रक्तवर्णेन पूरितं सार्वकामिकमेतद्वा सर्व
तोभद्रमंडलेन अंभःपूर्णपात्रं तोयपूर्णं हेमरत्नयुतं शुभं संस्थाप्य तस्मिन् रामाग्रे दमनं तत्र पूजयेत् वितानं पंचवर्णाढ्यं वध्यस्तु
मंडपं च निर्माय महतीं पूजां कुर्याज्जनदधिवासने पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः दमनत्वमिहागच्छ सान्निध्यं
कुरु ते नमः आवाहनमंत्रः ॐ क्लीं कामदेवाय नमः ॐ क्लीं रत्यै नमोस्त्विति दिक्षु स्मरशरीराय अनंगाय च नमो नमः
ॐ मन्मथाय च रामाय क्लीं वसंतसखाय च स्मराय चेक्षुचापाय पुष्पास्त्रायेति पूजयेत् ॐ तत्पुरुषाय विद्महे कामदेवाय धी
महि तन्नोऽनंगः प्रचोदयात् इति मन्मथगायत्र्या समंत्र्याष्टोत्तरशतं धूपदीपैश्च नैवेद्यैरुपचारैः प्रपूजयेत् हार्दं मममनुना ६०

पुष्पांजलिं दत्वाभिवंदयेत् नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे मन्मथाय जगन्नेत्रे रतिप्रिय नमोस्तु ते इति आमंत्रितोसि
देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव क्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वां पूजयि
ष्यामि सन्निधौ भव ते नमः निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभं सर्वथा सर्वदा विष्णो नमस्तेस्तु प्रसीद मे इत्यामन्त्र्य
देवेशं दत्वा पुष्पांजलिं पुनः पूजितं तं दमनकं कुंभस्योपरि संस्थितं श्रेष्ठेन सर्वतो रक्तेन कवचेनावगुंठयेत् रक्षेद्वा चक्रमं
त्रेणाथ हेरम्बमन्त्रेणाथवा ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च गीतमंगलनिर्घोषैः कुर्याज्जागरणं ततः इति दमनाधि
वासनं प्रातर्नत्वाथ देवेशं कुर्यात्स्नानं यथाविधि नित्यपूजां पृथक्कृत्वा कुर्यान्नैमित्तिकीं ततः दमनं हूर्वायपुञ्जं गंधाद्य
तसमन्वितं जयमंगलनिर्घोषैर्देवदेवे समर्पयेत् ॐ देवदेव जगन्नाथ वांछितार्थप्रदायक हृदिस्थान्पूरये: कामान्ममका
मेश्वरीप्रिय इदं दमनकं देव गृहाण मदनुग्रहात् इमां सांवत्सरीं पूजां भगवन्परिपूरय मूलं संपुटितो सैष दमनीरोपणे
मंत्रः एवं समर्प्य देवाय प्रार्थयेद्विश्वमव्ययं मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु गरुडध्वज
वनमाला यथा देव कौस्तुभं सततं हृदि तद्वद्दामनिकीं मालां पूजां च हृदये वह जानताजानता वापि न कृतं यन्मयार्चनं तत्सर्व
पूर्णतां यातु त्वत्प्रसादाद्रमापते जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन नमस्तेस्तु हृषीकेश महापुरुषपूर्वज मंत्रहीनं कि
याहीनं भक्तिहीनं जनार्दन यत्पूजितं मया देव परिपूर्णं तदस्तु मे एवं संप्रार्थ्य देवेशं निपतेद्दंडवद्भुवि अथ संपूजयेद्भक्त्या

त=२

चे. गुडं च घृतादिकं चापि तैः स्वयं च भक्त्याभ्यर्च्य वैष्णवान्विप्रान्संभोज्य पारयेत् स्यादश्वमेधजं पुण्यमित्याह भगवाञ्छिवः इति दमनारोपणे
पारणाहे न लभ्येत द्वादशी घटिकापि चेत् तदा त्रयोदशीयां सा पवित्रदमनार्पणे माधवे दमनारोपः स्यान्मध्ये विघ्नतो यदि
६१ वैशाखे श्रावणे भावे कर्त्तव्या तदर्पणं इति चैत्रकृत्यं वैशाखे पौर्णमास्यां तु जलस्थं जगदीश्वरं शुक्ले चैकादशीया
वत्पूजयेत्सुप्रहृष्टचित्तः तथा च गारुडे निक्षिप्य जलपात्रे तु मासे माधवसंज्ञिते माधवं येर्चयिष्यन्ति देवता लेन राक्षवि स्वर्ग
61 पात्रे तु धारयेत्तु तामे वा मृण्मयेपि वा तोयस्थं योर्चयेद्देवं सालग्रामसमुद्भवं प्रतिमां वा महाभाग तस्य पुण्यमनन्तकं न
स्माज्ज्येष्ठे महाभक्त्या तोयस्थं पूजयेद्धरिं वीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवमिति ज्येयः कालविकल्पेयद्यप्सप्ततावतस्य
नः गंधोदकयुते पात्रे नित्यं पूजां समाप्य च श्रुतिवासरदिनं पूजां समाप्य च प्रतिवासरदिने रात्रौ देवं नीत्वा निजाश्रमे पंचाप
चारैः संपूज्य तीर्थं प्राप्य विसर्जयेत् आत्मानं गृहदारादीन्तेनु तीर्थेन पावयेत् द्वादश्यां तु जले रात्रौ जलस्थं जलशायिनमि
ति इति वैशाखज्येष्ठयोः कृत्यं आषाढशुक्लद्वादश्यां नीराजि शयनोत्सवः कार्योन्यथा तन्नाहंहि भवन्त्यो रेणावाक्यतः भविष्ये
मिथुनस्थे सहस्रांशौ स्वापयेन्मधुसूदनं तुलाराशिगते तस्मिन्पुनरुत्थापयेत्प्रभुमिति गारुडे मिथुनस्थे सहस्रांशौ ये तु
स्वापयन्ति ये हरिं वैष्णवैः सह संभूय ते नाहंहि तदा भवेदिति भविष्योक्तप्रकारस्तु प्रोच्यते शयनोत्सवे पारणाहे प्रदोषे च
घंटादीन्वादयन्बहु विधाय महतीं पूजां विष्णुमभ्यर्च्य वैष्णवान् शौनकोक्तप्रकारेण तन्मप्रदोकथारणं कर्त्तव्यं वैष्णवैः ६१

वि=

सर्वैः संप्रदायात्तरोयतः असन्नत्वंतदामोऽश्नुते हृतासद्ध्रहन्त्रत्तस्मामाशात तयोः पवित्रं वितनंदिव्यस्यदेशो वेतोऽस्य
स्यंतंतवोऽस्थिवन् इति ऋग्वेदे सहोवाचयाज्ञवल्क्यस्तस्मात्स्मानात्महिताय प्रसृगाह हरिंभजेत्सुश्लोकमौलेर्वमा।
एपम्रिनामेदथत इति शातपथी श्रुतिः प्रतिद्विसाअर्चकेस्तुतनेज नांभोधीतन्नैवेचर्षणीन्द्राः मूलेर्वा स्त्वार्दथत्यप्ररा
णलिङ्गान्येङ्गतनाष्याद्यथात्यर्पयेत इति सामवेदे अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ब्राह्मणस्य तथैवेदं तन्त्रच।
क्रादियारणमिति याम स्मृतिः श्रुतिस्मृतिशतेहक्तास्त्तम्यकारः प्रतत्यते बह्वृचपरिशिष्टे प्रोक्तोयः शौनकादि
भिः षोडशोपचारैर्भगवन्तमभ्यर्च्य ऋचेऽपरमेत्त्यामत शन्नोमित्रः शंवरुण इत्येताभ्यां चक्रे शंखं चाभ्यर्च्य द्वा
दशार्णं तहिनज्जरायायैर्मकृते प्रथमस्य प्रचेतसृ इत्येताभ्यामग्नावादध्यात् वैश्वानरस्य सुमतौ स्यामेत्यनयाग्निं
परिषिचेत् पुरुषसूक्तेन षोडशाहुतीर्हुत्वा भगवन्तं पुरुषसूक्तेनोपस्तुत्य योब्रह्माणमिति प्रदंडवन्निपतेत्
अथसुदर्शनमहाज्वालसूर्यकोटिसमप्रभ अज्ञानां धस्यमेनित्यं विष्णोमार्गं प्रदर्शय इत्यादाय ॐ सुदर्शना
यविद्महे महाज्वालाय धीमहि तन्नश्चक्रं प्रचोदयात् इति चक्रं धारयेत् पंचजन्यनिजध्वांतस्त्वपातकसंचयं पाहिमां
पापिनंघोरं संसारार्णवपातिनं इत्यादाय पंचजन्याय विद्महे हयवामनाय धीमहि तन्नो शंखः प्रचोदयात् इति
शंखं धारयेदिति यएवं कुरुते विद्वान्ब्राह्मणः श्रोत्रियः शुचिः सर्वपापैः प्रमुच्येत विष्णुलोकं च गच्छति शायन्यांचैव

च॰ वोथन्यांचक्रतीर्थेतथैवच शांखचक्रांवियानेनचक्रिपूतोभवेन्नरः इतिमुद्राधारणविधिः ततोराज्यपनरयानेनयायाद्रोहंसमंसवैर्लवैः
६२ गीतवादित्रघोषेणदेवीनीनाजलाशयं पुष्पांजलिंप्रदायाथयानादुत्तारयेत्प्रभुं ततोरंगिन्यामसमाधायसहस्रदलेनोपवेश
येत् यौनांघ्रिपाणिराचांतःकुर्यान्नित्यमाह्नतःन्यासंहाव्नाथदेवेवस्वर्णचर्मासनवाकतः तथापुरुषसूक्तेनोत्तरनारा
62 यणेनच पंचामृतेनसंस्नाप्यपूजाभ्यर्थ्यारघूत्तमंमंत्रेनोदैवेतिमंत्रेणजलेप्रस्वापयेत्प्रभुं शेषपर्यंकवर्येस्मिनफलाम
गणगणामले स्वपतहीपांतरेदेवकुरुतिद्रांनमोस्त्विति प्रथकृत्वामहापूजांगंधस्रग्धूपदीपकैः अनन्ताह्वलतन्मायैरा
भरणस्तवयहेहरेः स्वपेत्वयिजगन्नाथजगत्सुप्तंभवेदिदं विबुद्धेचविबुद्धेतप्रसन्नोमेभवाव्ययः इतिसंप्रार्थनत्स्याग्रेगृह्णी
यान्नियमानिमान् स्वपतद्देयभोगिनाथेयोगिनाथस्थितेनवायि चातुर्मास्यव्रतेत्वजांदेहिलक्ष्मीपतेमम १ लब्धानुज्ञां
शांखहस्तोयथाप्रोषितभर्तृकाचतुरोवार्षिकान्मासाप्रारचबोस्थापनावधि इमंकरिष्येनिर्विघ्नंकुरुमेच्युत इदंव्रतंमया
देवगृहीतंपुरतस्तवनिर्विघ्नंसिद्धिमायातुप्रसादात्तेरमापते गृहीतेस्मिनव्रतेदेवहीनपंचरुत्वनिर्विघ्नंसिद्ध पंचत्वयदिमे
भवेत् तदाभवतुसंपूर्णंप्रसादात्तेरघूद्वह इत्यभ्यर्थ्याथदेवायशंखेनार्घ्यनिवेदयेत् श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतु
था दुग्धामाश्वयुजेमासिकार्तिकेचामिषंत्यजेत् प्राणिपगहर्णंचर्मावुजंवीरंवीचप्रत्यकं श्रायत्तशिष्टमन्नाद्यंयद्धिस्मार
निवेदितं दग्धमन्नंमसूरंचमाषंचेन्यपुष्टयामिषं रुच्यंतद्देशालभ्यंफलमूलादिवर्जयेत् निष्पावीनाजमाषांश्चमसूरं

संधितानिच हंताकंचकलिंगंचमसूनं देवेनभक्षये।दितिस्मृतेः चतुर्थपीहमासेषुहविष्याशीनपापभाक् हैमंतिकंसि
तास्विन्नंधान्यंमुद्गायवास्तिलाः कलायकंगुनीवारावास्तूकंहिमलोचिका षष्टिकाकालशाकंचमूलकंकेमुकेतरत्
कंदंसैंधवसामुद्रेगव्येचदधिसर्पिषी पयोनुद्धृतसारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैवनागरंगंचतिंतिडी
कदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपक्वंमुनयोहविष्याण्णंप्रचक्षते अन्यान्यपिप्रशस्तानिदृष्ट्वानिव्रतानित्र
ततस्तत्वाप्रजापालेराजन्याशास्यमंगलं शंखतीर्थेचसंस्नाप्यगीतनृत्यादिनाहरिं परितोष्याथसंहृष्टवैसवानरया
नकं भगवंतंसमारोप्यगीतवादित्रघोषतः आगत्यमंदिरेहृत्वामहानीराजनंप्रभोः विसृज्यवैसवान्देवमुपवेश्यप
सुखंस्वपेत् इत्याषाढेशयनोत्सवः श्रावणस्यसितेपक्षेद्वादश्यांश्रोत्रकादिभिः उक्तःसदाप्रकर्तव्यःपवित्रारोपणोत्सवः
तथाचवह्निचपरिशिष्टे सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः हरिश्चप्रीतिमाप्नोतियःपवित्रंसमाचरेत् विधिनाशा
स्त्रादृष्टेनयोनकुर्यात्पवित्रकं हरंतिराक्षसास्तस्यवर्षपूजादिकंफलमिति पाद्मे ऊर्जेव्रतमथोदोलांश्रावणेतंतुपू
जनंचैत्रेचदमनारोपमकुर्वाणोव्रजत्यधः इति पवित्रारोपणंविघ्नाच्छ्रावणेनभवेद्यदि कार्त्तिकेचविधिज्ञःकालेकर्तव्यमि
तिनारदः इतिपवित्रनित्यता प्रयोगसाराद्युत्पत्तिः पवित्रस्यप्रतन्यते कनीयान्वासुकेर्नाम्नापवित्रोनामनागराट्
निराहारप्रव्रतोभूत्वावैदिकंशारदंशतं नपश्चात्पेसमाधिन्यदेवदेवंमहेश्वरं प्रसन्नस्तपसातस्यप्रददौस्वान्हृषोत्तमः

चे. प्रणतार्तिहरः शंभुरविरोधीउमापतिः प्रसादाभिमुखं दृष्ट्वा देवं सभुजगेश्वरः कंठाभरणनाशाङ्कं वव्रे वरमनुत्तमं तथेत्याभाष्य तं
६३ तद्वारयंस्त्रिपुरान्तकः प्रादात्तस्मैव वरं चान्यत्पविज्ञायात्मयोगिने येनावहृतमन्यं ते यथासंभावितो मया जपहोमादिकं ते
षां फलं वामतं निष्फलं यात् अद्यैव श्रावणे मासि सितपक्षे चापि वै सदा तस्मादारायतंतस्तान्नित्यनैमित्तिकोद्यताः वैदिकाः
63 शक्तहोमेन यज्ञांश्चर्वन्तु तेन च तत्माहृव्यपगतकोरणानिवीतेनैव तांत्रिकाः आराध्यारोप्यसूत्र्यायै देवतायै पवित्रकमिति
इतिपवित्रोत्पत्तिः नानागमोक्तमार्गेण तस्य कर्तव्यतोच्यते हैम्यरौप्यताम्र दौर्भैः सूत्रैः कौशेयपद्मजैः कुशैश्च कार्य्या
प= कर्पासैः ब्राह्मणाकर्तितैः शुभैः कन्ययावस्त्रिवृतैः स्यान्नवपृष्यादिभिः कृतैः त्वानात्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधये
त् हृन्मंत्रेण पंचगव्यैरद्भिः प्रक्षाल्येत्ततः मूलेनाष्टोत्तरशतं गायत्र्यारामसंज्ञया शंखोदकेनाभिमंत्र्यापवित्राणि वि
निर्ममेत् दुग्धं दध्याज्यविण्मूत्रैः पंचगव्यक्रमं विदुः आप्यायस्व दधिक्राव्णस्तेजोसिशुक्रमस्यथा गायत्र्यातोगंधद्वारामि
ग्राःस्युः पंचगव्यके मधुवातेति गायत्रीक्रमः पंचामृते तथा इतिसूत्रशुद्धिः तत्रोत्तमं पवित्रं त्वषष्ट्यासहस्रशतैस्त्रिभिः स
मन्त्रासहितद्वाभ्यां शताभ्यां मध्यमं सूत्रं साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् अष्टोत्तरं तदर्द्धं हि नवसूत्रीक्रमेण
वा जानूस्तनाभिपर्यंतमुत्तमादित्रयं भवेत् अष्टोत्तरसहस्रेण वनमालां समाचरेत् उत्तमस्य पवित्रस्य हेतुणेपनायिभावये
त् आरभ्य मुकुटं यावत्सूत्रैर्विरचिता शुभा आपादलंबिनीमाला वनमाला प्रकीर्तिता यजमानपवित्रं वाधिवासनय

६३

कुत्रचित् विघ्नो भवेत् दानेन कर्त्तु स्यादशुभं फलं पवित्रं परया भक्त्या
तस्मात्कुर्वीत =४

वित्रकं कनिष्ठेन समं कार्य्यं मध्यमेव समं गुरोः स्वैः पवित्रं कुर्वीत मध्यमेन समं शुभं साधारणपवित्राणि त्रिभिः सूत्रैः समा
चरेत् उत्तमं तु शतग्रंथि पञ्चाशद्ग्रंथि मध्यमं कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशद्ग्रंथि शोभनं षट्त्रिंशच्चतुर्विंशद्द्वादशेति च केचन
चतुर्विंशद्द्वादशाष्टौ इति के मनयो विदुः ग्रंथिपर्वमानं तु कुर्य्याद्ग्रंथिमध्यान्तमे तदर्द्धेन तदर्द्धेन मध्यमेव कनिष्ठकं
ग्रथ्नीत कुर्वीत सर्वत्र स्वहस्तात्म मनोहरान् नैवे विषमसंख्याकान् ग्रथ्नीत कुर्वीत शोभनं कुंकुमे रोचनेनैव कर्पूरेण विमि
श्रितं ततोभिमंत्रणं कुर्यात् इदं विष्णुमंत्रतः द्वादशाक्षरमंत्रो वा सर्वसाधारणस्ततः त्रिभिरुत्तमसूत्रैः स्यात्तद्देवाधिवा
सके हि मध्यमेभिमंत्रः स्यात्कनिष्ठेन सहोन्मृतः इति पवित्रलक्षणं ततस्तानि पवित्राणि वैणवे पटले शुभे संस्थाप्य
शुचिवस्त्रेण विधाय पुरतो न्यसेत् अर्चनीयेमितां वैष्णवीं कुर्यात् षट्त्रिंशतां गुणैः मंत्रयेत्मूलमंत्रेण पंचगव्येन शोधयेत्
तांस्तु कर्त्ता तु देहनामात संस्नानमाचरेत् ततस्सर्वतोरस्तां कृत्वा यो होममाचरेत् स्वयं तु भगवत्स्वर्णमहतीं च समाच
रेत् महास्नाने प्रकुर्वीत उपचारांस्तथैव च देवस्य सर्वतस्याग्यं दत्त्वा काष्टजलं कुशाः मृत्तिका च हरिद्रा च कुंकुमं गोरोचनादि
च पादुकोपानहौ छत्रं चामरं व्यजनं तथा ब्रीह्यादिनि च धान्यानि पुरतः स्थापयेत्तथा देवस्त्राणि पात्रेषु स्तोत्रैर्नानाविधै
रपि वैदिकैश्च जपैर्देवं यथावत्स्तुति रोचयेत् क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो मयैतत्क्रियते देव तत्र चैतत्पवित्र
कं न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः उपवासेन देवत्वं तोषयामि जगत्पते काम

चं. कोथादयोप्येतेनमेस्सर्बेलयात्मकाः स्वयप्रभृतिदेवेशायावेद्देशोषिकंदिते तावद्ध्यानयाकार्यासर्वस्यास्यनमेोस्तुते एवंवि।
त्याय्यदेवेशंगरुयादौप्रणम्यच कुर्वीतवैस्तवेः साईपदिव्योरायणेहृदि: ॐमंयुगणोत्तुनाहर्ष्यसर्वतोभद्रकेशुभे स्थाप
६४ येत्पुरतोविष्णोस्तत्रसूत्राणिपूजयेत् ॐसर्ववित्सरस्यायाराग्स्यपवित्रीकरणायभोः विष्णुलोकात्पवित्राद्यश्रागच्छेहन।
मोस्तुते श्रनेनवाहयेत्सूत्रंमूलमंत्रयतेनच उत्तमादित्रयेविद्वानस्मरेदेवत्रयंतथा गणान्वदत्रयंचैवध्यायेल्लोकत्रयं
64 तथा प्रकृतिंवतस्र्वीयांमालायांनिखिलात्मिकां श्रुलोकंमोऽङ्कदेवसूत्रेध्यायेत्तद्भावशालिनि ॐसर्वाभरणाचित्रांगसर्व
देवतानमस्कृत लावण्यरूपविश्वात्मत्ज्येष्ठसूत्रंसमाश्रयं ॐसर्वलक्ष्मीकरश्रीशसर्वत्तानसमात्मक सर्वाधारस्थ
रारूपसर्वकर्त्रीप्रजापते सर्वगात्मेशशस्त्रेस्मिन्मान्नियंकुरुतेनमः सर्वरत्नोज्वलाकारब्रह्मांडब्रह्मरूपविधा सृष्टादौत्व
मसर्वांगशिरःसूत्रेऽस्मिन्दिभो प्रकृतेजगतःकर्त्रिसर्वालावण्यदायिनि श्रीमूत्रेसर्वकल्याणिसान्निध्यंकुरुतेनमः
उत्तमादीनिसूत्राणिक्रमादालभ्ययाणिना मुनिभिर्मत्रयेदेतैःपूजयेन्मूलमंत्रतः ब्रह्माविष्णुर्महादेवास्त्रिसूत्रीदेवता
स्मृताः ॐकारमामवन्हीवब्रह्मानागणशीरविः शिवश्चविश्वेदेवाश्चनवसूत्राधिदेवताः क्रियाचपौरुषीवीराविज
येषापराजिता मनोन्मयीजयाभद्रामुक्तिश्चग्रंथिदेवताः ध्यानावाहामृतीकृत्यगंधपुष्पादतंडकैः धूपदीपान्नता
म्बलैःपवित्रंविधयायजेत् श्रथदेवकरैविष्ठानपरस्त्रमुसङ्गवं वितास्तिमानकंहोरंवक्षीयात्मंगलात्मकं ॐसंवत्सर ६४

कृतो वा यः संपूर्णफलदोपियत् पवित्रारोपणायैतत्कुरुकं यत्नेन नमः मूलसंपुटितानादस्माद्वन्त्योपवित्रकं नीराजयेत्ततोदेवं
मंगलाघोषपूर्वकं नैवेद्यं विविधं दद्यात्ताम्बूलमनुलेपनं उपविष्टस्ततो देवं जितंमित्यादिभिस्तवैः मंत्रेणाथ सुरेशानं दे
वदेवं निमंत्रयेत् आमंत्रितोसि देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ओं क्षीरोदधिमहा
नागशय्यावस्थितविग्रह प्रातस्त्वां पूजयिष्यामि सन्निधौ भव तेनमः निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं सर्वथा सर्व
दा विष्णो नमस्तेस्तु प्रसीद मे निपत्य दंडवद्भूमौ त्रिःप्रणम्य कृताञ्जलिः पुनः पूजितानापथपूजाणीक्रमंतच पुनःस्थितं अस्त्रेणस
र्वतो रक्षेत्कवचेनावगुंठयेत् रक्षोघ्नचक्रमंत्रेण त्वहरेर्मंत्रेणाथवा ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च गीतमंगल
निर्घोषैः कुर्य्याज्जागरणं ततः अधिवासविधिः प्रोक्तः कथितो नारदादिभिः इति पवित्राधिवासनं ततः प्रातः समुत्थाय पूज्या
त्तो देवं यथोदितं नित्यपूजां ततः कृत्वा पवित्राणं तथैव च नीराजयेच्छुभैः दीपैर्मंगलाघोषपूर्वकं स्तुत्वा च विविधैः स्तोत्रैः।
नत्वा देवं समर्चितं ततो मंगलनिर्घोषैः प्रावत्तूर्यादिनिःस्वनैः गंधपुष्पान्वितं तावकं दद्याद्देवाय सूत्रकं ओं राम राम नमस्तुभ्यं
गृहाण देव पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं शुद्धो भवाम्यहं देव त्व
त्प्रसादात्सुरेश्वर मूलसंपुटितो ह्येष पवित्रारोपणे मनुः अपापाद्वन्तिदेवेभ्यस्ततो दद्यात्स्वनामभिः नैवेद्यं तु महापू
र्वं ततो दद्याच्च भक्तितः नीराजयेत्ततो देवं रामकान्तं समंगलं संवीज्य चामरैः पुष्पैर्दर्पणं दर्शयेत्ततः विविधानि च

पं.
६५

पुष्पाणि दद्यात्पुष्पांजलिं तथा प्रार्थयेद्देवदेवेशं मंत्रैरेभिर्यथाविधि मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांव
त्सरी पूजा तवास्तु गरुडध्वज वनमालां यथा देव कौस्तुभं सततं हृदि तद्वत्पवित्रतंतूंश्च पूजां च हृदये वह जानताजानता वा-
पि न कृतं यन्मयार्चनं केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन यत्पूजितं मया
देव परिपूर्णं तदस्तु मे अपराधसहस्राणि क्रियंतेऽहर्निशं मया दासोयमिति मां मत्वा क्षमस्व मधुसूदन नियमं दे
व कृत्वा भक्तियुक्तेन चेतसा प्रणमेद्देवदेवेशं राममिष्टार्थदं बुधः ततः पवित्रं गुरवे दद्यात्कृत्वादिपूर्वकं अथैतं पूज
येद्भक्त्या स्वर्णवस्त्रांगुलेपनैः ब्राह्मणान्वैष्णवांश्चैव गंधपुष्पादिनार्चयेत् भक्ष्यापूतोषधैर्नानावस्त्रभोजनकांच
नैः मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा देवं तत्सूत्रसंदर्भं देशकालविवक्षया अन्यहं स्नानकार्यादि सूत्राणि पुना
र्यं कारयेत् अभिषिच्यार्घ्यतोयेन पुनर्देवं निवेशयेत् अथ यत्ते देवमभ्यर्च्य विशेषात्पुष्पचंदनैः नैवेद्यं विविधं
दत्वा ततः सूत्रं विसर्जयेत् ॐ सांवत्सरीं शुभां पूजां संपाद्य विधिवन्मया व्रजेदानीं पवित्रं त्वं विष्णुलोकं विसर्जितं
यावद्देवे पवित्राणि तावत्तिष्ठेत्समाहितः ब्रह्मचारी हविष्याशी देवपूजापरायणः पवित्रारोपणं कालेन करो
ति कदाचन तदाशतं जपेन्मंत्रं स्तोत्रं वापि समाचरेत् इति पवित्रारोपणं इति श्रावणकृत्यं अथ भाद्रपदे कृष्णक्रीडा
दशपाकर्णिकोत्सवः कर्त्तव्यो वैष्णवैः सार्द्धमायस्त्वसवडरैः तथा च भविष्योत्तरे श्रावणे भाद्रपदे मासि पकादश्यांसि ६५

तेहनि कटदानंभवेद्धिंस्मिन्महापातकनाशनमिति प्रापयेत्सवरीत्यात्तद्देवंनीत्वाजलाशयं कटदानोत्सवंकृ
र्वेद्इतिसंकल्प्यपूजयेत् देवदेवजगन्नाथयोगिगम्यनिरंजन कटदानंकृतंह्याद्यप्राप्तेभाद्रपदेशुभे अनेकक
ग्गिकाहत्रिंदद्क्षिणांगेग्रकल्पयेत् महाष्टजांततःकृत्वापूर्ववत्स्वगृहंव्रजेत् इतिकटदानोत्सवः इतिभाद्रपदं
कृत्यं आश्विनस्यसितेपक्षेदशम्यांविजयोत्सवःकर्त्तव्यःसुजनैःसार्द्धंसर्वत्रविजयार्थिभिः हनूमद्वाक्यमाक।
र्ण्यहृष्टातिजनकात्मजा आनंदपूर्णैःकपिभिर्विज्ञापितमुपस्थितं रथमारोप्यदेवेशंसर्वालंकारभूषितं सौमि
त्रिणायुतंधनुर्बाणपाणिंतंक्षीचरांतकं स्वलीलयाजगत्त्रातुमाविर्भूतमजंविभुं रथैरश्वैःगजैःपद्भिर्सोमित्री।
सुग्रीवादिभिः युतंराजोपचारैस्तंशमींप्रतिसमानयेत् शमीविस्पर्चनंकुर्वइतिसंकल्प्यपूजयेत् विस्तुधर्मो
कृमार्गेणयात्रानिर्विघ्नसिद्धये शमीपूजांसितारामंभक्तानामभयंकरं अर्चयित्वाशमीवृक्षमर्चयेच्चततःप्रमा
न् शमीशमयतीपापंशमीलोहितकंटकी धरित्र्यर्जुनबाणानांरामस्यप्रियवादिनी करिष्यमाणयात्रा
त्राययाकालंसुखंमया तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजिते गृहीत्वासाक्षतांईचशमीमूलगतांमृदं गी
तवादित्रनिर्घोषैस्ततोदेवंगृहंनयेत् कैश्चिद्देवस्तत्रभाव्यंकैश्चिद्भाव्यंतुवानरैः कैश्चिद्रक्षगणैर्भाव्यंकोशले
द्रसस्तदृष्टये निर्जितारातसाद्दैन्यावविरेणाजगतीतले रामराज्यंरामराज्यंरामराज्यमितिब्रुवन् आनीयस्वा

च. पयेत्स्वस्थंदिव्यसिंहासनेतुविभुं ततोनीराज्यदेवेशंप्रणमेदंडवद्भुवि ततोपभुक्तवस्त्रादिधारयेत्स्वजनैःसह इतिविष्णु
धर्मोक्तमाश्विनकृत्यं प्रारभ्यैकादशीशुक्लामाश्विनस्यतुजागरं प्रबोध्यदेवंकुर्वीतनक्तोदवाक्याद्द्विजोत्तमाः जा
६६ गरंकार्त्तिकेमासियःकरोत्यरुणोदये दामोदराग्रेगोविंदगोसहस्रफलंलभेत कार्त्तिकेपश्चिमेयामेस्तवंगी
तंकरोतियः वसतेश्वेतवैकुंठेपितृभिःसहनारद। नकरोतिनरोमूढःकार्त्तिकेहरिजागरं सयातिनरकंघोर
मितिपाद्मेविधानतः नीराज्यसंततोस्नायाद्विधिवत्तर्पयेद्धरेः व्रतंचरेत्तथाकिंचिच्छ्रुत्वोर्जेमाहिमानकं शंखेन
द्विपयसास्नमासंदामोदरप्रियं तिर्य्यग्योनिमवाप्नोतिइत्यदिपाद्माभिधानतः अथकार्त्तिकेशुक्लैकेहुतानत्प्राग
धारणं शायनस्तकप्रकारेणारथ्यमारोप्यमाधवं धौतांघ्रिपाणिःकुर्वीतसंकल्पंवैष्णवैःसह पंचगुणविशिष्टायां।
बोधिव्यामिंदिरापतेःकुर्वेप्रबोधमथवाप्रोक्तानमन्त्रंपठेत ब्रह्मेंद्ररुद्राग्निकुबेरसूर्य्यसोमादिभिर्वंदितवंदना
य बुध्यस्वदेवेशजगन्निवासमंत्रप्रभावेनसुखेनदेव इयंतुद्वादशीदेवप्रबोधायविनिर्मिता त्वयैवसर्वलोका।
नांहितार्थंशेषशायिना त्वयिसुप्तेजगन्नाथेजगत्सुप्तंभवेदिदं उत्थितेचेष्टतेसर्वमुत्तिष्ठोत्तिष्ठमाधव इदंविष्णु
रनेनाद्धृतल्पाद्गुत्थापयेत्प्रभुं प्राजायत्यंचगायत्र्यंवैष्णवंसर्वकामदं उत्तिष्ठोत्तिष्ठगोविंदयोगनिद्रांविहायच
अनेनमनुनोत्थायचेदावादित्रनिःस्वनैः नीरंसमुपवेश्यैषोमहात्रुयदमर्चयेत सोसावदभ्रकरुणोभगवा ६६

स्वहृदः प्रेमसिक्तेन नयनांबुरुहं हृदि जृंभत् उत्थाय विघ्नविजयाय वनाविषादं मध्याग्निरापनयतान्मुहृषःप्रयाणः ३
ति पुष्पांजलिं दत्वा सूक्तमाथर्वणं जपेत् स्नापयेद्राघवं पंचामृतैः पुरुषसूक्तेन नीराजयं मंत्रविन्यस्य वस्त्रालंकार
चंदनैः स्रग्धूपदीपदिव्यान्नैर्नाहलैस्तोषयेद्विभुं एवं कृत्वा महापूजां गृहीत्वा साक्षतं जलं प्रतिमासव्रतान्कृत्वा रा
घवाय निवेदयेत् श्रीधिष्ठितेमयानानानाशास्त्रमार्गस्पबृंजेः प्रभुः प्रभूतयानकस्यांते राघवः प्रीयतांमम एवंव्रतान्यर्पी
यित्वा स्तुवीत परमाद्भुतः श्रुतिस्तुत्यादिवर्द्धंदिवोधमानेरमापतिं जयत्वयेत्यादिवेदस्तुतिः स्वस्त्यस्तु विघ्नस्याखलः
प्रसीदतां ध्यायंतु भूतानि शिवं मिथोधिया मनश्च भद्रं भजतां मधोक्षजे ध्यावेश्यतांनोमतिरप्यहैतुकी इत्याशिवः स
मभ्यर्थ्य गीतवाद्यजयः स्वनैः पूजां चाखिलपापेभ्यो मुक्तायां तिहरेः प्रदद्यात्सेत्यादिवाहैर्मरकतरणकिंकिणी
जालमाला रत्नाद्यैर्मौक्तिकानामविरलमणिभिः संभृतैश्चैव हारैः हैमैः कुंभैः पात्रकाशिवनानाविचित्रैः भूषितैः के
तुमुख्यैः छत्रैर्ब्रह्मशर्वैर्योदुरितहरवरैः पातुजेत्रो रथो वः पलायध्वं पलायध्वं रे रे दितिजदानवाः संरक्षणाय लोकानां
रथारूढो न्रकेशवः इत्यादिविस्मृथमौक्तमंत्रैः संतोष्य सादरं प्रसादमालांन्हरेर्गृहीयाद्भक्तिभावितः जयदेव
महादेव जयरामाविलेश्वरात् वरदेव्गाविलरक्षरत् जगत्पते जयसीतापते देव जयदैत्यानिषूदन देवदेवाखि
लाधार याहि नः शरणागतान् नत्वैवं वाद्यैर्भगवतिं यत्नवाद जयस्वनैः शामयेत्संपदंनविस्मा : परमध्येसमन्ततः

चै. रथस्याकर्षणं श्रेष्ठं पुरतो दैत्यनायकाः सुराश्च सिद्धसंघाश्च मुनिगन्धर्वमानवाः यावन्त्यदानि कृष्णस्य रथस्याकर्षणे नरः
करोति कृतुभिस्तानि तुल्यानि तव नायकः रथेन सह गच्छन्ति पुरतः पृष्ठतोऽग्रतः महाविष्णुसमाश्लेषेन भवन्त्याविभवाश्च
६७ पि श्रीकृष्णस्य रथयोगं भांये प्रकुर्वन्ति वदन्ति च जयेति च पुनर्ये वै तेषां लोकाः सनातनाः रथस्थितो नरैर्दृष्टो विप्रपूजितो म
धुसूदनः ददाति वाञ्छितं तेषां मन्ते च परमां गतिं दोलायमानं गोविन्दं रथस्थं मधुसूदनं नराणां भक्त्या सह हृद् दृष्ट्वा
67 पुनर्जन्म न विद्यते रथेन भ्रममाणेयेन गच्छन्ति जनार्दनं विप्रा वेदविदस्तेऽपि विज्ञेयाः श्वपचाधमाः येषां गृहागतो
याति रथस्थः श्रीनृकेसरी पूजितैस्तैः प्रकर्तव्या विद्वन् शाठ्यविवर्जितैः अनर्चितो यदा याति प्रमादात्त्वगृहाद्बहिः
पितरस्तस्य विप्रस्य यावदष्टसंवत्सरं नृप स्त्रियोऽपि भक्तिमायान्ति रथयात्रापरायणाः नीराजनेन गीतेन जायन्ते मण्डले
श्वराः रथोत्सवस्य माहात्म्यं कलौ वित्तं नतेहृयः सशैलवनदेशाढ्येन तेन दत्ता वसुंधरा इति पद्मपुराणोक्तो श्रीमयिता
रथं गृहं गत्वा तीराज्यपदे वे पांशयीनरायवंस्मरन् इति रथमहोत्सवः पौर्णमास्यां तु संध्यायां कर्तव्यः स्नेपुरोत्सवः
दृष्ट्वा प्रदीयं नो विप्रजन्मितः श्वपचाऽपि इति स्कान्दे नेपुरोत्सवः इति कार्त्तिककृत्यं मार्गशीर्षप्रथमे कृत्वा योऽभ्य
र्चयेद्धरिं भोजयित्वा द्विजान्भक्त्या स्यादिन्याहृकलिप्रियः नक्तव्रतेन यो मासं मार्गशीर्षे हरिप्रियं नयेदसौ नरो या
ति विष्णुलोकं सनातनं इति विष्णुधर्मे मार्गशीर्षकृत्यं पौषस्यैकादशीं कृत्वा आरभ्य स्थण्डिलशयः मासमात्रं स्तु

सु= ६७

प्रीतेपेहिवारंस्नानमाचरेत् त्रिकालमर्चयेद्रामंसप्तकभोगोजितेंद्रियः माघस्यद्वादशीशुक्लायावन्त्यथुफलप्रदा मासम
र्दनवर्द्ध्वादशगृहेवाप्तदर्द्धकं कृत्वायातिहरेःस्थानंरजांवदमतोत्सवं विसर्ज्यनिवेदितान्नेनयष्टव्यंदेवतानंतरं पितृ
भ्यश्चैवतद्देयंतदानंत्यायकल्प्यते पितृभ्योपितयोदद्याद्धारयेपरमात्मने रेतोदाःपितरस्तस्यभवंतिक्लेशभा।
गिनः गीतैर्वाद्यैश्चनृत्यैश्चदधिभक्तंसमर्पयेत् अर्चयित्वाहरेर्भक्त्याप्रसादादनयेन्नरः यःप्रसादंहरेर्भक्त्याप्र
प्नोतिप्रददातिच भुक्तिर्वेसवैःसार्द्धमानंतफलमश्नुते इतिविष्णुधर्मे माघपुष्पयोर्दध्योदनोत्सवः तपस्येपौ
र्णमास्यांतुकुर्याद्धैदोलिकोत्सवं वसंतोत्सवंप्रकुर्वीतपरमानंदरूपिणे प्रभातेविमलेजातेप्रतिपद्यास्फोटाद
ये कृत्वाचावश्यकंकर्मसंतर्प्यपितृदेवताः वंदयेद्धोलिभूतिंचसर्वदुष्टोपशांतये वंदितासिसुरेंद्रेणब्रह्मणा
शंकरेणच अतस्त्वंपाहिभूतेभ्योभूतेभूतिप्रदाभव प्रातर्वसंतसमयेरमणीरमाया अभ्यर्चचंदनरमालतुरुप्रवा
लैःप्रार्थ्यानिहुतकुसुमानिनिवेद्यदेवंसंतोषयद्विविधगीतविनोदनृत्यैः मंडितेचवितेशुद्धेउपलिप्तेगृहाजिरे चतुष्कं
कारयेद्वामधेवर्णकैश्चावृतेनैःशुभैः तन्मध्येस्थापयेत्पीठमस्तुलकवृत्तोत्तरच्छदं अपतःपूर्णकलशंस्थापयेत्पल्लवैर्युतं
आसनेचोपविष्टस्यब्राह्मणयोषेणभारत अभिषेकप्रकर्तव्यःसहदैश्चूतपल्लवैः कुसुमेहृतैर्हृदस्यवसंतनवपल्लवैःसं
शयामिसुखदमायुरारोग्यवर्द्धनं योपिवीतवसंतादौहुतपुष्पंससचंदनं सम्यक्हृदस्यकाम[illegible]कुर्वंतेजनाः
अनंतरंद्विजेंद्राणांसूतमागधवंदिनां दद्याद्दानंयथाशक्त्याकामात्माप्रीयतामिति ततोभोजनवेलायांफल्गुनंतथा

चं॰

६८

68

गोवत्सहिते प्राशयेत्प्रथमं चान्नं ततो भुंजीत कामतः सायं चूतकसंस्थितक्षुद्रपीठगतां हरिम् नूतनैर्भाभसाच्चूतपल्लवै।
वैरभिषेचयेत् एवं यः कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवं मत्प्रसादाच्च सिध्यंति तस्य सर्वे मनोरथाः हेमंते च वसंतसमये
सितपंचदश्यां प्रातर्वसंतसमये समुपस्थिते च संप्राश्य चूतकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोथ समां सुखी स्यात्
इति भविष्योत्तरे श्रीभगवदुक्तो वसंतोत्सवः इति फाल्गुनकृत्यं अधिमासे तु संप्राप्ते स्नानासीनाप्रतिहारे स्ववर्णं।
चाज्यसंयुक्तं त्रयस्त्रिंशदपूपकं दद्याच्चैव द्विजश्रेष्ठाय कुटुंबिने नश्यंत्यकरणीयोत्थपुण्यं च द्वादशमासजं
इति भविष्योत्तरे अधिकमासकृत्यं द्वादशस्वपि मासेषु पक्षयोरुभयोरपि विष्णूत्सवः प्रकर्तव्य एकादश्यां च जागरः
दशम्यां प्रातरुत्थाय कृतमैत्रादिको व्रती देवार्चनक्रियां कृत्वा कुर्यात्संकल्पमादृतः दशमीदिनमारभ्य करिष्ये
हं व्रतं तव त्रिदिनं देवदेवेश निर्विघ्नं कुरु केशव इत्युच्चार्यार्पयेत्पुष्पांजलिं श्रीरामपादयोः शंखोदकेन संकल्प्य प्रणमे
द्दंडवद्विभुं इति दशमीसंकल्पः एकादश्यां तु पूर्णायां निर्वर्त्य दंतधावनं स्नात्वा देवार्चनं कृत्वा व्रतसंकल्पमाचरेत् एका
दश्यां निराहारः स्थित्वाहमपरेऽहनि भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत इति चांजलिपात्रेणार्पयेद्देवलवाक्यतः
गृहीतोदुंबरपात्रे वारिपूर्णमुदङ्मुखः उपवासं गृहीत्वाथ मंत्रपूतं जलं पिबेत् इत्येकादशीसंकल्पः कृत्वानावपपकं
सर्वं द्वादश्यां व्रतमर्पयेत् अज्ञानतिमिरांधस्य व्रतेनानेन केशव प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव इति द्वादशी
संकल्पः भविष्योक्तप्रकारेण कुर्याद्धि त्रिदिनं व्रतं प्रसिद्धत्वात्तदस्माभिः कार्त्स्न्येन प्रपंचितं कृष्णजन्माष्टमी सख्याथर्मं

तोनागमोदिता तत्तत्कास्त्रात्तुविज्ञेयावैस्त्रवीवैस्तवैतैरैः प्रसिद्धत्वान्नचोक्तंनेग्रंथविस्तरभीतितः प्रसिद्धस्यपतस्यसंकोचेरेश
सिद्धस्यविस्तरः चैत्रादिहृदितोस्वाभिः कर्त्तव्यस्यशांतहृष्टये व्रतात्तंदेनिममस्यतालेमेस्यात्स्थिरंमनः त्वत्पादपद्मयो
येनयथासाज्ञानकीपते तत्कालतायेनततोस्तिमेयतः प्रकाशितातेचंतचंद्रिकेयं तद्देवाभवत्वंसहितेनयस्मात्
स्मात्तुदत्यंतहरिरामचंद्र रामोस्मीत्यतियत्नधीरनिरंतरामंभजेतत्तुष्टयेयद्रामेणनियुक्तमेतदखिलंरामायतत्त्वार्पये
रामादेतदभिन्नमेवचरितंकोवेत्तिरामस्यतद्रामंसर्वमिदंविलीयतइतोमेरामसाम्यंततः कार्कश्यपदशकंयरोरक्ष
यतेसत्माद्देवंमैथिलीदारुवंचविभीषणेणवद्भविधंस्तेहपतःसांप्रतं संसारदावानलतापशांत्यैश्रीरामचंद्रार्चन
चंद्रिकेयं स्यात्संहितामार्गमपाश्रयद्भिर्भवादिभिर्निर्मितमोक्षपंथ्या पटलैःपंचभिःश्रोक्तंश्रीरामार्चनचंद्रिका श्री
नंदवननाम्नाहृदिकविनाहरितुष्टये ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदवनश्रीचरणशिष्यानंदव
नविरचितायांश्रीरामार्चनचंद्रिकायांपंचमःपटलः संपूर्णः समाप्ताचेयंरामार्चनचंद्रिका ॥ संवत् १९ २९ ॥

69